ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

## (वाक्य सहित)

# षष्ठकाण्डे चतुर्थः प्रश्नः

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **September 30, 2021**

## Version Notes:

**This is now the current Version 1.0 dated September 30, 2021.**

1. This replaces the earlier version 0.0 dated October 31, 2019.

2. We have listened to the Pada Parayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till September 30, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 30th September 2018 |
| 2nd | Version Number | 0.0 dated 31st January 2019 |
| 3rd | Version Number | 0.0 dated 31st Oct 2019 |

# Contents


**6 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे षष्ठं काण्डं 4**

**6.4 षष्ठकाण्डे चतुर्थः प्रश्नः – सोममन्त्रब्राह्मणनिरूपणं.... 4**

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, हरिः ओं

# 6 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे षष्ठं काण्डं

## 6.4षष्ठकाण्डे चतुर्थः प्रश्नः – सोममन्त्रब्राह्मणनिरूपणं

**TS 6.4.1.1**

यज्ञेन वै प्रजापतिः प्रजा असृजत ता उपयड्भि–रेवासृजत

यदुपयज उपयजति प्रजा एव तद् यजमानः सृजते जघनार्द्धादव

द्यति जघनार्द्धाद्धि प्रजाः प्रजायन्ते स्थविमतो ऽव द्यति स्थविमतो

हि प्रजाः प्रजायन्ते ऽसंभिन्दन्नव द्यति प्राणाना–मसंभेदाय न

पर्यावर्तयति यत् पर्यावर्तयेदुदावर्तः प्रजा ग्राहुकः स्याथ् समुद्रं गच्छ

स्वाहेत्याह रेत– [ ] 1

**TS 6.4.1.1 - Padam**

यज्ञेन । वै । प्रजापतिरिति प्रजा – पतिः । प्रजा इति प्र – जाः ।

असृजत । ताः । उपयड्भिरित्युपयट्–भिः । एव । असृजत । यत् ।

उपयज इत्युप – यजः । उपयजतीत्युप – यजति ।

प्रजा इति प्र – जाः । एव । तत् । यजमानः । सृजते ।

जघनार्द्धादिति जघन – अर्द्धात् । अवेति । द्यति ।

जघनार्द्धादिति जघन–अर्द्धात् । हि । प्रजा इति प्र – जाः ।

प्रजायन्त इति प्र – जायन्ते । स्थविमतः । अवेति । द्यति ।

स्थविमतः । हि । प्रजा इति प्र–जाः । प्रजायन्त इति प्र–जायन्ते ।

असंभिन्दन्नित्यसं – भिन्दन्न् । अवेति । द्यति ।

प्राणानामिति प्र – अनानाम् । असंभेदायेत्यसं – भेदाय ।

न । पर्यावर्तयतीति परि – आवर्तयति । यत् । पर्यावर्तयेदिति

परि – आवर्तयेत् । उदावर्तः । प्रजा इति प्र – जाः । ग्राहुकः ।

स्यात् । समुद्रम् । गच्छ । स्वाहा । इति । आह । रेतः । **1 (50)**

**<u>TS 6.4.1.2</u>**

एव तद् दधात्यन्तरिक्षं गच्छ स्वाहेत्याहाऽन्तरिक्षेणैवास्मै प्रजाः

प्र जनयत्यन्तरिक्ष७ ह्यनु प्रजाः प्रजायन्ते देव७ सवितारं गच्छ

स्वाहेत्याह सवितृप्रसूत एवास्मै प्रजाः प्र जनयत्य–होरात्रे गच्छ

स्वाहेत्याहा–होरात्राभ्या–मेवास्मै प्रजाः प्र जनयत्य–होरात्रे

ह्यनु प्रजाः प्रजायन्ते मित्रावरुणौ गच्छ स्वाहे– [ ] **2**

**TS 6.4.1.2 - Padam**

एव । तत् । दधाति । अन्तरिक्षम् । गच्छ । स्वाहा । इति । आह ।

अन्तरिक्षेण । एव । अस्मै । प्रजा इति प्र – जाः । प्रेति । जनयति ।

अन्तरिक्षम् । हि । अन्विति । प्रजा इति प्र – जाः । प्रजायन्त इति

प्र – जायन्ते । देवम् । सवितारम् । गच्छ । स्वाहा । इति । आह ।

सवितृप्रसूत इति सवितृ – प्रसूतः । एव । अस्मै । प्रजा इति

प्र – जाः । प्रेति । जनयति । अहोरात्रे इत्यहः – रात्रे । गच्छ ।

स्वाहा । इति । आह । अहोरात्राभ्यामित्यहः – रात्राभ्याम् । एव ।

अस्मै । प्रजा इति प्र–जाः । प्रेति । जनयति । अहोरात्रे

इत्यहः–रात्रे । हि । अन्विति । प्रजा इति प्र – जाः । प्रजायन्त इति

प्र–जायन्ते । मित्रावरुणाविति मित्रा–वरुणौ । गच्छ । स्वाहा । **2 (50)**

**TS 6.4.1.3**

–त्याह प्रजास्वेव प्रजातासु प्राणापानौ दधाति सोमं गच्छ स्वाहेत्याह

सौम्या हि देवतया प्रजा यज्ञं गच्छ स्वाहेत्याह प्रजा एव यज्ञियाः

करोति छन्दा॑ᳲसि गच्छ स्वाहेत्या॑ह पशवो॑ वै छन्दा॑ᳲसि
पशूनेवाव॑ रुन्धे॑ द्यावा॑पृथि॒वी ग॑च्छ स्वाहेत्या॑ह प्रजा एव प्रजा॑ता
द्यावा॑पृथिवीभ्या॑मुभयतः परि गृह्णा॑ति नभो– [ ] **3**

**TS 6.4.1.3 - Padam**

इति॑ । आह । प्रजास्विति॑ प्र – जासु॑ । एव । प्रजा॑तास्विति
प्र – जातासु । प्राणापानाविति॑ प्राण – अपानौ । दधाति ।
सोम॑म् । गच्छ । स्वाहा॑ । इति॑ । आह । सौम्याः । हि । देवतया ।
प्रजा इति॑ प्र – जाः । यज्ञम् । गच्छ । स्वाहा॑ । इति॑ । आह ।
प्रजा इति॑ प्र–जाः । एव । यज्ञियाः॑ । करोति । छन्दा॑ᳲसि । गच्छ ।
स्वाहा॑ । इति॑ । आह । पशवः॑ । वै । छन्दा॑ᳲसि । पशून् । एव ।
अवेति॑ । रुन्धे । द्यावा॑पृथिवी इति द्यावा॑–पृथिवी । गच्छ । स्वाहा॑ ।
इति॑ । आह । प्रजा इति॑ प्र – जाः । एव । प्रजा॑ता इति प्र–जाताः ।
द्यावा॑पृथिवीभ्यामिति द्यावा॑ – पृथिवी॑भ्याम् । उभयतः॑ । परीति ।
गृह्णाति । नभः॑ । **3 (50)**

**TS 6.4.1.4**

दिव्यं गच्छ स्वाहेत्याह प्रजाभ्य एव प्रजाताभ्यो वृष्टिं नि यच्छत्यग्निं

वैँश्वानरं गच्छ स्वाहेत्याह प्रजा एव प्रजाता अस्यां प्रति ष्ठापयति

प्राणानां वाँ एषोऽव द्यति यो ऽवद्यति गुदस्य मनो मे हार्दि यच्छेत्याह

प्राणानेव यथास्थानमुप ह्वयते पशोर्वा आलब्धस्य हृदय७ शुगृच्छति

सा हृदयशूल– [ ] **4**

**TS 6.4.1.4 - Padam**

दिव्यम् । गच्छ । स्वाहा । इति । आह । प्रजाभ्य इति प्र–जाभ्यः ।

एव । प्रजाताभ्य इति प्र – जाताभ्यः । वृष्टिम् । नीति । यच्छति ।

अग्निम् । वैश्वानरम् । गच्छ । स्वाहा । इति । आह । प्रजा इति

प्र – जाः । एव । प्रजाता इति प्र – जाताः । अस्याम् । प्रतीति ।

स्थापयति । प्राणानामिति प्र–अनानाम् । वै । एषः । अवेति । द्यति ।

यः । अवद्यतीत्यव – द्यति । गुदस्य । मनः । मे । हार्दि । यच्छ ।

इति । आह । प्राणानिति प्र – अनान् । एव । यथास्थानमिति

यथा – स्थानम् । उपेति । ह्वयते । पशोः । वै ।

आलब्धस्येत्या– लब्धस्य । हृदयम् । शुक् । ऋच्छति । सा ।

हृदयशूलमिति हृदय – शूलम् । **4 (50)**

**TS 6.4.1.5**

–मभि समेति यत् पृथिव्या॑ हृदयशूल–मुद्वासयेत् पृथिवी॑

शुचाऽर्पयेद् यदफ्स्वपः शुचाऽर्पयेच्छुष्कस्य चाऽऽर्द्रस्य च

सन्धावुद्–वासयत्युभयस्य शान्त्यै यं द्विष्यात् तं ध्याये–च्छुचैवैन–

मर्पयति ॥ **5**

**TS 6.4.1.5 - Padam**

अभि । समिति । एति । यत् । पृथिव्याम् । हृदयशूलमिति

हृदय – शूलम् । उद्वासयेदित्युत् – वासयेत् । पृथिवीम् । शुचा ।

अर्पयेत् । यत् । अफ्स्वित्यप्– सु । अपः । शुचा । अर्पये।

शुष्कस्य । च । आर्द्रस्य । च । सन्धाविति सं – धौ । उदिति ।

वासयति । उभयस्य । शान्त्यै । यम् । द्विष्यात् । तम् । ध्यायेत् ।

शुचा । एव । एनम् । अर्पयति ॥ **5 (32)** ***(रेतो – मित्रावरुणौ गच्छ स्वाहा – नभो – हृदयशूलं – द्वात्रि॑शच्च) (A1)***

**TS 6.4.2.1**

देवा वै यज्ञमाग्नीद्ध्रे व्यभजन्त ततो यदत्यशिष्यत तदब्रुवन् वसतु

नु न इदमिति तद् वसतीवरीणां ँवसतीवरित्वं तस्मिन् प्रातर्न

समशक्नुवन् तदफ्सु प्रावेशयन् ता वसतीवरीरभवन्

वसतीवरीर्गृह्णाति यज्ञो वै वसतीवरीर्यज्ञमेवाऽऽरभ्य गृहीत्वोप

वसति यस्यागृहीता अभि निम्रोचे–दनारब्धो ऽस्य यज्ञः स्याद्– [ ] 6

**TS 6.4.2.1 - Padam**

देवाः । वै । यज्ञम् । आग्नीद्ध्र इत्याग्नि – इद्ध्रे । वीति ।

अभजन्त । ततः । यत् । अत्यशिष्यतेत्यति–अशिष्यत । तत् ।

अब्रुवन्न् । वसतु । नु । नः । इदम् । इति । तत् । वसतीवरीणाम् ।

वसतीवरित्वमिति वसतीवरि – त्वम् । तस्मिन्न् । प्रातः । न ।

समिति । अशक्नुवन्न् । तत् । अफ्स्वित्यप् – सु । प्रेति ।

अवेशयन्न् । ताः । वसतीवरीः । अभवन्न् । वसतीवरीः । गृह्णाति ।

यज्ञः । वै । वसतीवरीः । यज्ञम् । एव । आरभ्येत्या – रभ्य ।

गृहीत्वा । उपेति । वसति । यस्य । अगृहीताः । अभीति ।

निम्रोचेदिति नि – म्रोचेत् ।

अनारब्ध इत्यना – रब्धः । अस्य । यज्ञः । स्यात् । **6 (50)**

**TS 6.4.2.2**

यज्ञं ँवि च्छिन्द्या–ज्ज्योतिष्या वा गृह्णीयाद्धिरण्यं ँवा ऽवधाय सशुक्राणामेव गृह्णाति यो वा ब्राह्मणो बहुयाजी तस्य कुंभ्यानां गृह्णीयाथ् स हि गृहीतवसतीवरीको वसतीवरीर्गृह्णाति पशवो वै वसतीवरीः पशूनेवाऽऽरभ्य गृहीत्वोप वसति यदन्वीपं तिष्ठन् गृह्णीयान्निर्मार्गुका अस्मात् पशवः स्युः प्रतीपं तिष्ठन् गृह्णाति प्रतिरुद्ध्यैवास्मै पशून् गृह्णातीन्द्रो– [ ] **7**

**TS 6.4.2.2 - Padam**

यज्ञम् । वीति । छिन्द्यात् । ज्योतिष्या । वा । गृह्णीयात् । हिरण्यम् । वा । अवधायेत्यव – धाय । सशुक्राणामिति स–शुक्राणाम् । एव । गृह्णाति । यः । वा । ब्राह्मणः । बहुयाजीति बहु – याजी । तस्य । कुंभ्यानाम् । गृह्णीयात् । सः । हि । गृहीतवसतीवरीक इति गृहीत – वसतीवरीकः । वसतीवरीः ।

गृह्णाति । पशवः । वै । वसतीवरीः । पशून् । एव ।
आरभ्येत्या– रभ्य । गृहीत्वा । उपेति । वसति । यत् । अन्वीपम् ।
तिष्ठन्न् । गृह्णीयात् । निर्मार्गुका इति निः – मार्गुकाः । अस्मात् ।
पशवः । स्युः । प्रतीपम् । तिष्ठन्न् । गृह्णाति ।
प्रतिरुद्ध्येति प्रति – रुद्ध्य । एव । अस्मै । पशून् । गृह्णाति ।
इन्द्रः । **7 (50)**

**TS 6.4.2.3**

वृत्रमहन्थ् सोऽ(1)पोऽ(1)भ्यम्रियत तासां यन्मेद्ध्यं यज्ञियꣳ
सदेवमासीत् तदत्यमुच्यत ता वहन्तीरभवन् वहन्तीनां गृह्णाति या
एव मेद्ध्या यज्ञियाः सदेवा आप स्तासा–मेव गृह्णाति नान्तमा
वहन्तीरतीयाद्– यदन्तमा वहन्तीरतीयाद् यज्ञमति मन्येत न स्थावराणां
गृह्णीयाद् वरुणगृहीता वै स्थावरा यथ् स्थावराणां गृह्णीयाद्– [ ] **8**

**TS 6.4.2.3 - Padam**

वृत्रम् । अहन्न् । सः । अपः । अभीति । अम्रियत । तासाम् । यत् ।
मेद्ध्यम् । यज्ञियम् । सदेवमिति स – देवम् । आसीत् । तत् ।
अतीति । अमुच्यत । ताः । वहन्तीः । अभवन्न् । वहन्तीनाम् ।

गृह्णाति । याः । एव । मेद्ध्याः । यज्ञियाः । सदेवा इति स – देवाः । आपः । तासाम् । एव । गृह्णाति । न । अन्तमाः । वहन्तीः । अतीति । इयात् । यत् । अन्तमाः । वहन्तीः । अतीयादित्यति–इयात् । यज्ञम् । अतीति । मन्येत । न । स्थावराणाम् । गृह्णीयात् । वरुणगृहीता इति वरुण – गृहीताः । वै । स्थावराः । यत् । स्थावराणाम् ।

गृह्णीयात् । **8 (50)**

**TS 6.4.2.4**

–वरुणेनास्य यज्ञं ग्राहयेद् यद्–वै दिवा भवत्यपो रात्रिः प्र विशति तस्मात् ताम्रा आपो दिवा ददृश्रे यन्नक्तं भवत्यपो ऽहः प्र विशति तस्माच्चन्द्रा आपो नक्तं ददृश्रे छायायै चाऽऽतपतश्च सन्धौ गृह्णात्य–होरात्रयोरेवास्मै वर्णं गृह्णाति हविष्मतीरिमा आप इत्याह हविष्कृतानामेव गृह्णाति हविष्मा(ं) अस्तु– [ ] **9**

**TS 6.4.2.4 - Padam**

वरुणेन । अस्य । यज्ञम् । ग्राहयेत् । यत् । वै । दिवा । भवति । अपः । रात्रिः । प्रेति । विशति । तस्मात् । ताम्राः । आपः । दिवा ।

ददृश्रे । यत् । नक्तम् । भवति । अपः । अहः । प्रेति । विशति ।
तस्मात् । चन्द्राः । आपः । नक्तम् । ददृश्रे । छायायै । च ।
आतपत इत्या – तपतः । च । सन्धाविति सं – धौ । गृह्णाति ।
अहोरात्रयोरित्यहः – रात्रयोः । एव । अस्मै । वर्णम् । गृह्णाति ।
हविष्मतीः । इमाः । आपः । इति । आह । हविष्कृतानामिति
हविः – कृतानाम् । एव । गृह्णाति । हविष्मान् । अस्तु । **9 (50)**

**<u>TS 6.4.2.5</u>**

सूर्य इत्याह सशुक्राणामेव गृह्णात्यनुष्टुभा गृह्णाति वाग्वा
अनुष्टुग् वाचैवैनाः सर्वया गृह्णाति चतुष्पदयर्चा गृह्णाति त्रिः सादयति
सप्त सं पद्यन्ते सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाव रुन्धे
ऽस्मै वै लोकाय गार्.हपत्य आ धीयतेऽमुष्मा आहवनीयो यद्
गार्.हपत्य उपसादयेदस्मिन् ँल्लोके पशुमान्थ् स्याद्
यदाहवनीयेऽमुष्मिन्– [ ] **10**

**<u>TS 6.4.2.5 - Padam</u>**

सूर्यः । इति । आह । सशुक्राणामिति स – शुक्राणाम् । एव ।
गृह्णाति । अनुष्टुभेत्यनु – स्तुभा । गृह्णाति । वाक् । वै ।

अनुष्टुगित्यनु – स्तुक् । वाचा । एव । एनाः । सर्वया । गृह्णाति ।
चतुष्पदयेति चतुः – पदया । ऋचा । गृह्णाति । त्रिः । सादयति ।
सप्त । समिति । पद्यन्ते । सप्तपदेति सप्त – पदा । शक्वरी ।
पशवः । शक्वरी । पशून् । एव । अवेति । रुन्धे । अस्मै । वै ।
लोकाय । गार्.हपत्य इति गार्.ह – पत्यः । एति । धीयते ।
अमुष्मै । आहवनीय इत्या – हवनीयः । यत् । गार्.हपत्य इति
गार्.ह – पत्ये । उपसादयेदित्युप – सादयेत् । अस्मिन्न् ।
लोके । पशुमानिति पशु – मान् । स्यात् । यत् ।
आहवनीय इत्या – हवनीये । अमुष्मिन्न् । **10 (50)**

**TS 6.4.2.6**

ँलोके पशुमान्थ् स्यादुभयोरुप सादयत्युभयोरेवैनं ँलोकयोः
पशुमन्तं करोति सर्वतः परि हरति रक्षसामपहत्या
इन्द्राग्नियोर्भागधेयीः स्थेत्याह यथायजुरेवैतदाग्नीद्ध्र उप
वासयत्येतद्–वै यज्ञस्यापराजितं ँयदाग्नीद्ध्रं ँयदेव यज्ञस्यापराजितं
तदेवैना उप वासयति यतः खलु वै यज्ञस्य विततस्य न क्रियते ( )

तदनु यज्ञ॒ꣳ रक्षा॒ꣳस्यव चरन्ति यद् वहन्तीनां गृह्णाति क्रियमाणमेव
तद् यज्ञस्य शये रक्षसा–मनन्ववचाराय न ह्येता ईलयन्त्या
तृतीयसवनात् परि शेरे यज्ञस्य सन्तत्यै ॥ 11

**TS 6.4.2.6 - Padam**

लोके । पशुमानिति पशु – मान् । स्यात् । उभयोः । उपेति ।
सादयति । उभयोः । एव । एनम् । लोकयोः । पशुमन्तमिति
पशु – मन्तम् । करोति । सर्वतः । परीति । हरति । रक्षसाम् ।
अपहत्या इत्यप – हत्यै । इन्द्राग्नियोरितीन्द्र – अग्नियोः ।
भागधेयीरिति भाग – धेयीः । स्थ । इति । आह ।
यथायजुरिति यथा–यजुः । एव । एतत् । आग्नीद्ध्र
इत्याग्नि – इद्ध्रे । उपेति । वासयति । एतत् । वै । यज्ञस्य ।
अपराजितमित्यपरा–जितम् । यत् । आग्नीद्ध्रमित्याग्नि – इद्ध्रम् ।
यत् । एव । यज्ञस्य । अपराजितमित्यपरा – जितम् । तत् । एव ।
एनाः । उपेति । वासयति । यतः । खलु । वै । यज्ञस्य । विततस्येति
वि – ततस्य । न । क्रियते ( ) । तत् । अन्विति । यज्ञम् । रक्षाꣳसि ।

अवेति । चरन्ति । यत् । वहन्तीनाम् । गृह्णाति । क्रियमाणम् । एव ।

तत् । यज्ञस्य । शये । रक्षसाम् । अनन्ववचारायेत्यननु – अवचाराय ।

न । हि । एताः । ईलयन्ति । एति ।

तृतीयसवनादिति तृतीय – सवनात् ।

परीति । शेरे । यज्ञस्य । सन्तत्या इति सं – तत्यै ॥ **11 (76)**

***(स्या – दिन्द्रो – गृह्णीया – दस्त्व – मुष्मिन् – क्रियते – षड्विꣳशतिश्च) (A2)***

**TS 6.4.3.1**

ब्रह्मवादिनो वदन्ति स **त्वा** अद्ध्वर्युः स्याद्–यः सोममुपावहरन्थ्

सर्वाभ्यो देवताभ्य उपावहरेदिति हृदे त्वेत्याह मनुष्येभ्य एवैतेन

करोति मनसे त्वेत्याह पितृभ्य एवैतेन करोति दिवे त्वा सूर्याय

त्वेत्याह देवेभ्य एवैतेन करोत्येतावतीर्वै देवतास्ताभ्य एवैनꣳ

सर्वाभ्य उपावहरति पुरा वाचः– [ ] **12**

**TS 6.4.3.1 - Padam**

ब्रह्मवादिन इति ब्रह्म–वादिनः । वदन्ति । सः । तु । वै । अद्ध्वर्युः । स्यात् । यः । सोमम् । उपावहरन्नित्युप – अवहरन्न् । सर्वाभ्यः । देवताभ्यः । उपावहरेदित्युप – अवहरेत् । इति । हृदे । त्वा । इति । आह । मनुष्येभ्यः । एव । एतेन । करोति । मनसे । त्वा । इति । आह । पितृभ्य इति पितृ – भ्यः । एव । एतेन । करोति । दिवे । त्वा । सूर्याय । त्वा । इति । आह । देवेभ्यः । एव । एतेन । करोति । एतावतीः । वै । देवताः । ताभ्यः । एव । एनम् । सर्वाभ्यः । उपावहरतीत्युप – अवहरति । पुरा । वाचः । **12 (50)**

**TS 6.4.3.2**

प्रवदितोः प्रातरनुवाकमुपाकरोति यावत्येव वाक् तामव रुन्धे ऽपो ऽग्रे ऽभिव्याहरति यज्ञो वा आपो यज्ञमेवाभि वाचं ँवि सृजति सर्वाणि छन्दा\<sup></sup>स्यन्वाह पशवो वै छन्दा\<sup></sup>सि पशूनेवाव रुन्धे गायत्रिया तेजस्कामस्य परि दद्ध्यात् त्रिष्टुभेन्द्रियकामस्य जगत्या पशुकामस्यानुष्टुभा प्रतिष्ठाकामस्य पङ्क्त्या यज्ञकामस्य विराजा ऽन्नकामस्य शृणोत्वग्निः समिधा हवं– [ ] **13**

**TS 6.4.3.2 - Padam**

प्रवदितोरिति प्र – वदितोः । प्रातरनुवाकमिति प्रातः – अनुवाकम् । उपाकरोतीत्युप–आकरोति । यावती । एव । वाक् । ताम् । अवेति । रुन्धे । अपः । अग्रे । अभिव्याहरतीत्यभि – व्याहरति । यज्ञः । वै । आपः । यज्ञम् । एव । अभीति । वाचम् । वीति । सृजति । सर्वाणि । छन्दाꣳसि । अन्विति । आह । पशवः । वै । छन्दाꣳसि । पशून् । एव । अवेति । रुन्धे । गायत्रिया । तेजस्कामस्येति तेजः – कामस्य । परीति । दद्ध्यात् । त्रिष्टुभा । इन्द्रियकामस्येतीन्द्रिय – कामस्य । जगत्या । पशुकामस्येति पशु – कामस्य । अनुष्टुभेत्यनु – स्तुभा । प्रतिष्ठाकामस्येति प्रतिष्ठा – कामस्य । पङ्क्त्या । यज्ञकामस्येति यज्ञ – कामस्य । विराजेति वि – राजा । अन्नकामस्येत्यन्न – कामस्य । शृणोतु । अग्निः । समिधेति सं – इधा । हवम् । **13 (50)**

**TS 6.4.3.3**

म इत्याह सवितृप्रसूत एव देवताभ्यो निवेद्यापो ऽच्छैत्यप इष्य

होतरित्याहेषित॑ं हि कर्म क्रियते मैत्रावरुणस्य चमसाद्ध्वर्यवा

द्रवेत्याह मित्रावरुणौ वा अपां नेतारौ ताभ्यामेवैना अच्छैति

देवीरापो अपां नपादित्याहाऽऽहुत्यैवैना निष्क्रीय गृह्णात्यथो

हविष्कृताना-मेवाभिघृतानां गृह्णाति- [ ] **14**

**TS 6.4.3.3 - Padam**

मे । इति । आह । सवितृप्रसूत इति सवितृ - प्रसूतः । एव ।

देवताभ्यः । निवेद्येति नि - वेद्य । अपः । अच्छ । एति । अपः ।

इष्य । होतः । इति । आह । इषितम् । हि । कर्म ।

क्रियते । मैत्रावरुणस्येति मैत्रा-वरुणस्य । चमसाद्ध्वर्यविति

चमस-अद्ध्वर्यो । एति । द्रव । इति । आह ।

मित्रावरुणाविति मित्रा - वरुणौ । वै । अपाम् । नेतारौ । ताभ्याम् ।

एव । एनाः । अच्छ । एति । देवीः । आपः । अपाम् । नपात् ।

इति । आह । आहुत्येत्या - हुत्या । एव ।

एनाः । निष्क्रीयेति निः - क्रीय । गृह्णाति । अथो इति ।

हविष्कृतानामिति हविः – कृतानाम् । एव ।
अभिघृतानामित्यभि – घृतानाम् । गृह्णाति । **14 (50)**

**TS 6.4.3.4**

कार्.षिरसीत्याह शमलमेवाऽऽसामप प्लावयति समुद्रस्य वो ऽक्षित्या उन्नय इत्याह तस्मादद्यमानाः पीयमाना आपो न क्षीयन्ते योनिर्वै यज्ञस्य चात्वालं ँयज्ञो वसतीवरीर्. होतृचमसं च मैत्रावरुणचमसं च स॒ᳶस्पर्श्य वसतीवरीर्व्यानयति यज्ञस्य सयोनित्वायाथो स्वादेवैना योनेः प्र जनयत्यद्ध्वर्यो ऽवे–रपा(3) इत्याहोते ( )–मनन्नमु–रुतेमाः पश्येति वावैतदाह यद्यग्निष्टोमो जुहोति यद्युक्थ्यः परिधौ नि मार्ष्टि यद्यतिरात्रो यजुर्वदन् प्र पद्यते यज्ञक्रतूनां ँव्यावृत्त्यै ॥ **15**

**TS 6.4.3.4 - Padam**

कार्.षिः । असि । इति । आह । शमलम् । एव । आसाम् ।
अपेति । प्लावयति । समुद्रस्य । वः । अक्षित्यै । उदिति । नये ।
इति । आह । तस्मात् । अद्यमानाः । पीयमानाः । आपः । न ।
क्षीयन्ते । योनिः । वै । यज्ञस्य । चात्वालम् । यज्ञः । वसतीवरीः ।

होतृचमसमिति होतृ – चमसम् । च । मैत्रावरुणचमसमिति

मैत्रावरुण – चमसम् । च । स॒ꣳस्पर्श्येति सं – स्पर्श्य ।

वसतीवरीः । व्यानयतीति वि – आनयति । यज्ञस्य । सयोनित्वायेति

सयोनि – त्वाय । अथो इति । स्वात् । एव । एनाः । योनेः । प्रेति ।

जनयति । अद्ध्वर्यो इति । अवेः । अपा(3)ः । इति । आह ।

उत ( ) । ईम् । अनन्नमुः । उत । इमाः । पश्य । इति । वाव ।

एतत् । आह । यदि । अग्निष्टोम इत्यग्नि – स्तोमः । जुहोति ।

यदि । उक्थ्यः । परिधाविति परि – धौ । नीति । मार्ष्टि । यदि ।

अतिरात्र इत्यति – रात्रः । यजुः । वदन्न् । प्रेति । पद्यते ।

यज्ञक्रतूनामिति यज्ञ – क्रतूनाम् । व्यावृत्त्या इति

वि – आवृत्त्यै ॥ **15 (75)** ***(वाचो – हव – मभिघृतानां गृह्णात्यु – त – पञ्चविꣳशतिश्च) (A3)***

**<u>TS 6.4.4.1</u>**

देवस्य त्वा सवितुः प्रसव इति ग्रावाणमा दत्ते प्रसूत्या अश्विनो–

र्बाहुभ्यामित्याहाश्विनौ हि देवानामद्ध्वर्यू आस्तां पूष्णो

हस्ताभ्यामित्याह यत्यै पशवो वै सोमो व्यान उपा॒ꣳशुसवनो
यदुपा॒ꣳशुसवन–मभि मिमीते व्यानमेव पशुषु दधातीन्द्राय त्वेन्द्राय
त्वेति मिमीत इन्द्राय हि सोम आह्रियते पञ्च कृत्वो यजुषा
मिमीते– [ ] 16

**TS 6.4.4.1 - Padam**

देवस्य । त्वा । सवितुः । प्रसव इति प्र – सवे । इति । ग्रावाणम् ।
एति । दत्ते । प्रसूत्या इति प्र – सूत्यै । अश्विनोः । बाहुभ्यामिति
बाहु–भ्याम् । इति । आह । अश्विनौ । हि । देवानाम् ।
अद्ध्वर्यू इति । आस्ताम् । पूष्णः । हस्ताभ्याम् । इति । आह ।
यत्यै । पशवः । वै । सोमः । व्यान इति वि – अनः ।
उपा॒ꣳशुसवन इत्युपा॒ꣳशु – सवनः । यत् ।
उपा॒ꣳशुसवनमित्युपा॒ꣳशु – सवनम् । अभीति । मिमीते ।
व्यानमिति वि – अनम् । एव । पशुषु । दधाति । इन्द्राय । त्वा ।
इन्द्राय । त्वा । इति । मिमीते । इन्द्राय । हि । सोमः । आह्रियत
इत्या – ह्रियते । पञ्च । कृत्वः । यजुषा । मिमीते । 16 (50)

**TS 6.4.4.2**

पञ्चाक्षरा प॒ङ्क्तिः पाङ्क्तो य॒ज्ञो य॒ज्ञमे॒वाव रुन्धे॒ पञ्च॒ कृत्वस्तू॒ष्णीं

द॒श सं पद्यन्ते॒ दशाक्षरा वि॒राडन्नं ँवि॒राड् वि॒रा॒जैवान्ना॒द्यमव रुन्धे

श्ञा॒त्राः स्थ वृ॒त्र॒तुर इत्या॒हैष वा अ॒पा८ँ सोमपी॒थो य ए॒वं ँवेद॒

नाफ्स्वार्ति॒मार्च्छ॒ति यत्ते सोम दि॒वि ज्योति॒रित्या॒है॒भ्य ए॒वैनं– [ ] **17**

**TS 6.4.4.2 - Padam**

पञ्चाक्ष॒रे॒ति पञ्च–अ॒क्ष॒रा । प॒ङ्क्तिः । पाङ्क्तः । य॒ज्ञः । य॒ज्ञम् । ए॒व ।

अवेति । रु॒न्धे॒ । पञ्च । कृत्वः । तू॒ष्णीम् । दश । समिति । प॒द्य॒न्ते॒ ।

दशाक्ष॒रे॒ति दश – अ॒क्ष॒रा । वि॒राडिति वि – राट् । अन्नम् ।

वि॒राडिति वि – राट् । वि॒राजेति वि – राजा । ए॒व ।

अ॒न्ना॒द्यमित्यन्न –अद्यम् । अवेति । रु॒न्धे॒ । श्ञा॒त्राः । स्थ॒ । वृ॒त्र॒तु॒र

इति वृत्र – तुरः । इति । आ॒ह॒ । ए॒षः । वै । अ॒पाम् । सो॒म॒पी॒थ इति

सोम – पी॒थः । यः । ए॒वम् । वेद । न । अ॒फ्स्वित्यप् – सु ।

आर्तिम् । एति । ऋ॒च्छ॒ति॒ । यत् । ते॒ । सो॒म॒ । दि॒वि । ज्योतिः ।

इति । आ॒ह॒ । ए॒भ्यः । ए॒व । ए॒न॒म् । **17 (50)**

**TS 6.4.4.3**

ँलोकेभ्यः सं भरति सोमो वै राजा दिशोऽभ्यद्ध्यायथ् स दिशो ऽनु

प्राविशत् प्रागपागुदगधरागित्याह दिग्भ्य एवैनꣳ सं भरत्यथो दिश

एवास्मा अव रुन्धे ऽम्ब नि ष्वरेत्याह कामुका एनꣳ स्त्रियो भवन्ति

य एवं ँवेद यत् ते सोमादाभ्यं नाम जागृवीत्या– [ ] **18**

**TS 6.4.4.3 - Padam**

लोकेभ्यः । समिति । भरति । सोमः । वै । राजा । दिशः ।

अभीति । अद्ध्यायत् । सः । दिशः । अनु । प्रेति । अविशत् ।

प्राक् । अपाक् । उदक् । अधराक् । इति । आह । दिग्भ्य इति

दिक् – भ्यः । एव । एनम् । समिति । भरति । अथो इति । दिशः ।

एव । अस्मै । अवेति । रुन्धे । अम्ब । नीति । स्वर । इति । आह ।

कामुकाः । एनम् । स्त्रियः । भवन्ति । यः । एवम् । वेद । यत् । ते ।

सोम । अदाभ्यम् । नाम । जागृवि । इति । **18 (50)**

**TS 6.4.4.4**

–हैष वै सोमस्य सोमपीथो य एवं ँवेद न सौम्यामार्तिमार्च्छति

घ्नन्ति वा एतथ् सोमं ँयदभिषुण्वन्त्यꣳशूनप गृह्णाति त्रायत

एवैनं प्राणा वा अ॒ꣳशवः प॒शवः सोमो ऽꣳशून् पुनरपि सृजति

प्राणानेव प॒शुषु दधाति द्वौद्वावपि सृजति तस्माद् द्वौद्वौ प्राणाः ॥ 19

**TS 6.4.4.4 - Padam**

आह । ए॒षः । वै । सोम॑स्य । सोमपीथ इति सोम – पीथः । यः ।

ए॒वम् । वेद॑ । न । सौम्याम् । आर्तिम् । एति । ऋच्छति । घ्नन्ति ।

वै । ए॒तत् । सोमम् । यत् । अभिषुण्वन्तीत्यभि – सुन्वन्ति ।

अꣳशून् । अपेति । गृह्णाति । त्रायते । ए॒व । ए॒नम् ।

प्राणा इति प्र – अनाः । वै । अꣳशवः । प॒शवः । सोमः ।

अꣳशून् । पुनः । अपीति । सृजति । प्राणानिति प्र – अनान् ।

ए॒व । प॒शुषु । दधाति । द्वौद्वाविति द्वौ – द्वौ । अपीति । सृजति ।

तस्मात् । द्वौद्वाविति द्वौ – द्वौ । प्राणा इति प्र – अनाः ॥ 19 (44)

*(यजुषा मिमीत – एनं – जागृवीति – चतुश्चत्वारिꣳशच्च) (A4)*

**TS 6.4.5.1**

प्राणो वा ए॒ष यदुपाꣳशु र्यदुपाꣳश्वग्रा ग्रहा गृह्यन्ते प्राणमेवानु

प्र यन्त्यरुणो ह स्माऽऽहौपवेशिः प्रातस्सवन एवाहं यज्ञꣳ सꣳ

स्थापयामि तेन ततः सꣳस्थितेन चरामीत्यष्टौ कृत्वो ऽग्रे ऽभि

षुणोत्यष्टाक्षरा गायत्री गायत्रं प्रातस्सवनं प्रातस्सवनमेव

तेनाऽऽप्नोत्येकादश कृत्वो द्वितीय–मेकादशाक्षरा त्रिष्टुप् त्रैष्टुभं

माद्ध्यन्दिनꣳ– [ ] 20

**TS 6.4.5.1 - Padam**

प्राण इति प्र – अनः । वै । एषः । यत् । उपाꣳशुरित्युप–अꣳशुः ।

यत् । उपाꣳश्वग्रा इत्युपाꣳशु – अग्राः । ग्रहाः । गृह्यन्ते ।

प्राणमिति प्र – अनम् । एव । अनु । प्रेति । यन्ति । अरुणः । ह ।

स्म । आह । औपवेशिरित्यौप – वेशिः । प्रातस्सवन इति

प्रातः–सवने । एव । अहम् । यज्ञम् । समिति । स्थापयामि । तेन ।

ततः । सꣳस्थितेनेति सं–स्थितेन । चरामि । इति । अष्टौ । कृत्वः ।

अग्रे । अभीति । सुनोति । अष्टाक्षरेत्यष्टा – अक्षरा । गायत्री ।

गायत्रम् । प्रातस्सवनमिति प्रातः – सवनम् । प्रातस्सवनमिति

प्रातः – सवनम् । एव । तेन । आप्नोति । एकादश । कृत्वः ।

द्वितीयम् । एकादशाक्षरेत्येकादश–अक्षरा । त्रिष्टुप् । त्रैष्टुभम् ।

माद्ध्यन्दिनम् । **20 (50)**

**TS 6.4.5.2**

सवनं माद्ध्यन्दिनमेव सवनं तेनाऽऽप्नोति द्वादश कृत्वस्तृतीयं

द्वादशाक्षरा जगती जागतं तृतीयसवनं तृतीयसवनमेव तेना

ऽऽ*प्नोत्येताꣳ ह वाव स यज्ञस्य सꣳस्थितिमुवाचा

स्कन्दायास्कन्नꣳ हि तद्-यद्-यज्ञस्य सꣳस्थितस्य स्कन्दत्यथो

खल्वाहुर्गायत्री वाव प्रातस्सवने नातिवाद इत्यनतिवादुक एनं

भ्रातृव्यो भवति य एवं वेद तस्मादष्टावष्टौ- [ ] **21**

**TS 6.4.5.2 - Padam**

सवनम् । माद्ध्यन्दिनम् । एव । सवनम् । तेन । आप्नोति । द्वादश ।

कृत्वः । तृतीयम् । द्वादशाक्षरेति द्वादश - अक्षरा । जगती ।

जागतम् । तृतीयसवनमिति तृतीय - सवनम् । तृतीयसवनमिति

तृतीय-सवनम् । एव । तेन । आप्नोति । एताम् । ह । वाव । सः ।

यज्ञस्य । सꣳस्थितिमिति सं - स्थितिम् । उवाच । अस्कन्दाय ।

अस्कन्नम् । हि । तत् । यत् । यज्ञस्य । सꣳस्थितस्येति

सं - स्थितस्य । स्कन्दति । अथो इति । खलु । आहुः । गायत्री ।

वाव । प्रातस्सवन इति प्रातः - सवने । न ।

अतिवाद इत्यति – वादे । इति । अनतिवादुक इत्यनति – वादुकः ।
एनम् । भ्रातृव्यः । भवति । यः । एवम् । वेद । तस्मात् ।
अष्टावष्टावित्यष्टौ – अष्टौ । **21 (50)**

**TS 6.4.5.3**

कृत्वो ऽभिषुत्यं ब्रह्मवादिनो वदन्ति पवित्रवन्तो ऽन्ये ग्रहा गृह्यन्ते
किंपवित्र उपा॑ꣳशुरिति वाक्पवित्र इति ब्रूयाद्–वाचस्पतये पवस्व
वाजिन्नित्याह वाचैवैनं पवयति वृष्णो अꣳशुभ्यामित्याह वृष्णो
ह्येतावꣳशू यौ सोमस्य गभस्तिपूत इत्याह गभस्तिना ह्येनं पवयति
देवो देवानां पवित्रमसीत्याह देवो ह्येष– [ ] **22**

**TS 6.4.5.3 - Padam**

कृत्वः । अभिषुत्यमित्यभि–सुत्यम् । ब्रह्मवादिन इति ब्रह्म–वादिनः ।
वदन्ति । पवित्रवन्त इति पवित्र – वन्तः । अन्ये । ग्रहाः । गृह्यन्ते ।
किम्पवित्र इति किम् – पवित्रः । उपाꣳशुरित्युप – अꣳशुः ।
इति । वाक्पवित्र इति वाक्–पवित्र ः । इति । ब्रूयात् । वाचः । पतये ।
पवस्व । वाजिन्न् । इति । आह । वाचा । एव । एनम् । पवयति ।

वृष्णः । अ॒ꣳ॒शुभ्या॒मित्य॒ꣳ॒शु – भ्या॒म् । इति । आ॒ह । वृष्णः । हि ।
ए॒तौ । अ॒ꣳ॒शू इति । यौ । सोम॑स्य । गभ॑स्तिपू॒त इ॒ति गभ॑स्ति–पू॒तः ।
इति । आ॒ह । गभ॑स्तिना । हि । ए॒नम् । प॒वय॑ति । दे॒वः । दे॒वाना॑म् ।
प॒वित्र॑म् । अ॒सि॒ । इति । आ॒ह । दे॒वः । हि । ए॒षः । **22 (50)**

**TS 6.4.5.4**

सन् दे॒वानां॑ प॒वित्रं॒ येषां॑ भा॒गो ऽसि॒ तेभ्य॒स्त्वेत्या॒ह येषा॒ꣳ॒ ह्ये॑ष
भा॒गस्तेभ्य॑ ए॒नं गृ॒ह्णा॒ति स्वाङ्कृ॒तो ऽसीत्याह प्रा॒णमे॒व स्वमकृ॒त
मधु॑मतीर्न॒ इषस्कृ॒धीत्या॒ह सर्व॑मे॒वास्मा इ॒दꣳ स्वदय॒ति विश्वे॑भ्य–
स्त्वेन्द्रि॒येभ्यो॑ दि॒व्येभ्यः॒ पार्थिवे॒भ्य इत्याहो॒भये॑ष्वे॒व देवमनु॒ष्येषु
प्रा॒णान् दधा॒ति मन॑स्त्वा– [ ] **23**

**TS 6.4.5.4 - Padam**

सन्न् । दे॒वाना॑म् । प॒वित्र॑म् । येषा॑म् । भा॒गः । अ॒सि । तेभ्यः॑ । त्वा॒ ।
इति । आ॒ह । येषा॑म् । हि । ए॒षः । भा॒गः । तेभ्यः॑ । ए॒नम् । गृ॒ह्णाति ।
स्वाङ्कृ॑तः । अ॒सि॒ । इति । आ॒ह । प्रा॒णमिति प्र – अ॒नम् । ए॒व ।
स्वम् । अ॒कृ॒त । मधु॑मती॒रिति॒ मधु॑ – म॒तीः॒ । न॒ः । इषः । कृ॒धि॒ ।
इति । आ॒ह । सर्व॑म् । ए॒व । अ॒स्मै॒ । इ॒दम् । स्व॒दय॒ति । विश्वे॑भ्यः ।

त्वा । इन्द्रियेभ्यः । दिव्येभ्यः । पार्थिवेभ्यः । इति । आह । उभयेषु ।
एव । देवमनुष्येष्विति देव – मनुष्येषु । प्राणानिति प्र – अनान् ।
दधाति । मनः । त्वा । **23 (50)**

**TS 6.4.5.5**

ऽष्टि्वत्याह मन एवाश्ञुत उर्वन्तरिक्ष–मन्विहीत्याहा–न्तरिक्षदेवत्यो
हि प्राणः स्वाहा त्वा सुभवः सूर्यायेत्याह प्राणा वै स्वभवसो
देवास्तेष्वेव परोक्षं जुहोति देवेभ्यस्त्वा मरीचिपेभ्य इत्याहाऽऽदित्यस्य
वै रश्मयो देवा मरीचिपास्तेषां तद् भागधेयं तानेव
तेन प्रीणाति यदि कामयेत वर्.षुकः पर्जन्यः– [ ] **24**

**TS 6.4.5.5 - Padam**

अष्टु । इति । आह । मनः । एव । अश्ञुते । उरु । अन्तरिक्षम् ।
अन्विति । इहि । इति । आह । अन्तरिक्षदेवत्य इत्यन्तरिक्ष–देवत्यः ।
हि । प्राण इति प्र – अनः । स्वाहा । त्वा । सुभव इति सु – भवः ।
सूर्याय । इति । आह । प्राणा इति प्र – अनाः । वै । स्वभवस इति
स्व – भवसः । देवाः । तेषु । एव । परोक्षमिति परः – अक्षम् ।

जुहोति । देवेभ्यः । त्वा । मरीचिपेभ्य इति मरीचि – पेभ्यः । इति ।
आह । आदित्यस्य । वै । रश्मयः । देवाः । मरीचिपा इति
मरीचि–पाः । तेषाम् । तत् । भागधेयमिति भाग–धेयम् । तान् ।
एव । तेन । प्रीणाति । यदि । कामयेत । वर्.षुकः ।
पर्जन्यः । **24 (50)**

**TS 6.4.5.6**

स्यादिति नीचा हस्तेन नि मृज्याद्–वृष्टिमेव नि यच्छति यदि
कामयेतावर्.षुकः स्यादित्युत्तानेन नि मृज्याद्–वृष्टिमेवोद्–यच्छति
यद्यभिचरेदमुं जह्यथ त्वा होष्यामीति ब्रूयादाहुतिमेवैनं प्रेफ्सन्
हन्ति यदि दूरे स्यादा तमितोस्तिष्ठेत् प्राणमेवास्यानुगत्य हन्ति
यद्यभिचरेदमुष्य– [ ] **25**

**TS 6.4.5.6 - Padam**

स्यात् । इति । नीचा । हस्तेन । नीति । मृज्यात् । वृष्टिम् । एव ।
नीति । यच्छति । यदि । कामयेत । अवर्.षुकः । स्यात् । इति ।
उत्तानेनेत्युत् – तानेन । नीति । मृज्यात् । वृष्टिम् । एव । उदिति ।
यच्छति । यदि । अभिचरेदित्यभि – चरेत् । अमुम् । जहि । अथ ।

त्वा । होष्यामि । इति । ब्रूयात् । आहुतिमित्या – हुतिम् । एव ।

एनम् । प्रेफ्सन्निति प्र–ईफ्सन्न् । हन्ति । यदि । दूरे । स्यात् । एति ।

तमितोः । तिष्ठेत् । प्राणमिति प्र – अनम् । एव । अस्य ।

अनुगत्येत्यनु – गत्य । हन्ति । यदि । अभिचरेदित्यभि – चरेत् ।

अमुष्य । **25 (50)**

**<u>TS 6.4.5.7</u>**

त्वा प्राणे सादयामीति सादयेदसन्नो वै प्राणः प्राणमेवास्य सादयति

षड्भि–र७्शुभिः पवयति षड् वा ऋतव ऋतुभिरेवैनं पवयति

त्रिः पवयति त्रय इमे लोका एभिरेवैनं ँलोकैः पवयति ब्रह्मवादिनो

वदन्ति कस्माथ् सत्यात् त्रयः पशूना७् हस्तादाना इति यत्

त्रिरुपा७्शु७् हस्तेन विगृह्णाति तस्मात् त्रयः पशूना७् हस्तादानाः

पुरुषो ( ) हस्ती मर्कटः ॥ **26**

**<u>TS 6.4.5.7 - Padam</u>**

त्वा । प्राण इति प्र – अने । सादयामि । इति । सादयेत् । असन्नः ।

वै । प्राण इति प्र – अनः । प्राणमिति प्र – अनम् । एव । अस्य ।

सादयति । षड्भिरिति षट् – भिः । अ॒ꣳशुभिरित्यꣳशु – भिः ।
पवयति । षट् । वै । ऋतवः । ऋतुभिरित्यृतु – भिः । एव । एनम् ।
पवयति । त्रिः । पवयति । त्रयः । इमे । लोकाः । एभिः । एव ।
एनम् । लोकैः । पवयति । ब्रह्मवादिन इति ब्रह्म–वादिनः । वदन्ति ।
कस्मात् । सत्यात् । त्रयः । पशूनाम् । हस्तादाना इति
हस्त–आदानाः । इति । यत् । त्रिः । उपाꣳशुमित्युप – अꣳशुम् ।
हस्तेन । विगृह्णातीति वि – गृह्णाति । तस्मात् । त्रयः । पशूनाम् ।
हस्तादाना इति हस्त – आदानाः । पुरुषः ( ) । हस्ती ।
मर्कटः ॥ **26 (52)**

***(माध्यन्दिन – मष्टावष्टा – वेष – मनस्त्वा – पर्जन्यो – ऽमुष्य – पुरुषो – द्वे च) (A5)***

**TS 6.4.6.1**

देवा वै यद् यज्ञे ऽकुर्वत तदसुरा अकुर्वत ते देवा उपाꣳशौ यज्ञꣳ
सꣳस्थाप्यमपश्यन् तमुपाꣳशौ समस्थापयन् ते ऽसुरा वज्रमुद्यत्य
देवानभ्यायन्त ते देवा बिभ्यत इन्द्रमुपाधावन्

तानिन्द्रो ऽन्तर्यामेणान्तरधत्त तदन्तर्यामस्यान्तर्यामत्वं ँयदन्तर्यामो गृह्यते भ्रातृव्यानेव तद् यजमानो ऽन्तर्द्धत्ते ऽन्तस्ते– [ ] 27

**TS 6.4.6.1 - Padam**

देवाः । वै । यत् । यज्ञे । अकुर्वत । तत् । असुराः । अकुर्वत । ते । देवाः । उपा॒ꣳशावित्युप – अ॒ꣳशौ । यज्ञम् । स॒ꣳस्थाप्यमिति सं – स्थाप्यम् । अपश्यन्न् । तम् । उपा॒ꣳशावित्युप – अ॒ꣳशौ । समिति । अस्थापयन्न् । ते । असुराः । वज्रम् । उद्यत्येत्युत् – यत्य । देवान् । अभीति । आयन्त । ते । देवाः । बिभ्यतः । इन्द्रम् । उपेति । अधावन्न् । तान् । इन्द्रः । अन्तर्यामेणेत्यन्तः – यामेन । अन्तः । अधत्त । तत् । अन्तर्यामस्येत्यन्तः – यामस्य । अन्तर्यामत्वमित्यन्तर्याम – त्वम् । यत् । अन्तर्याम इत्यन्तः–यामः । गृह्यते । भ्रातृव्यान् । एव । तत् । यजमानः । अन्तः । धत्ते । अन्तः । ते । 27 (50)

**TS 6.4.6.2**

दधामि द्यावापृथिवी अन्तरु–र्वन्तरिक्ष–मित्याहैभिरेव लोकैर्यजमानो

भ्रातृव्यानन्तर्द्धत्ते ते देवा अमन्यन्तेन्द्रो वा इदमभूद्–यद्

वय७ स्म इति ते ऽब्रुवन् मघवन्ननु न आ भजेति सजोषा देवैरवरैः

परैश्चेत्यब्रवीद्–ये चैव देवाः परे ये चावरे तानुभया– [ ] **28**

**TS 6.4.6.2 - Padam**

दधामि । द्यावापृथिवी इति द्यावा – पृथिवी । अन्तः । उरु ।

अन्तरिक्षम् । इति । आह । एभिः । एव । लोकैः । यजमानः ।

भ्रातृव्यान् । अन्तः । धत्ते । ते । देवाः । अमन्यन्त । इन्द्रः । वै ।

इदम् । अभूत् । यत् । वयम् । स्मः । इति । ते । अब्रुवन्न् ।

मघवन्निति मघ – वन्न् । अन्विति । नः । एति । भज । इति ।

सजोषा इति स – जोषाः । देवैः । अवरैः । परैः । च । इति ।

अब्रवीत् । ये । च । एव । देवाः । परे । ये । च । अवरे । तान् ।

उभयान् । **28 (50)**

**TS 6.4.6.3**

नन्वाभजथ् सजोषा देवैरवरैः परैश्चेत्याह ये चैव देवाः परे ये चावरे तानुभया–नन्वाभज–त्यन्तर्यामे मघवन् मादयस्वेत्याह यज्ञादेव यजमानं नान्तरेत्युपयामगृहीतो ऽसीत्याहापानस्य धृत्यै यदुभावपवित्रौ गृह्येयातां प्राणमपानो ऽनु न्यृच्छेत् प्रमायुकः स्यात् पवित्रवानन्तर्यामो गृह्यते– [ ] **29**

**TS 6.4.6.3 - Padam**

अन्वाभजदित्यनु – आभजत् । सजोषा इति स – जोषाः । देवैः । अवरैः । परैः । च । इति । आह । ये । च । एव । देवाः । परे । ये । च । अवरे । तान् । उभयान् । अन्वाभजतीत्यनु– आभजति । अन्तर्याम इत्यन्तः – यामे । मघवन्निति मघ – वन्न् । मादयस्व । इति । आह । यज्ञात् । एव । यजमानम् । न । अन्तः । एति । उपयामगृहीत इत्युपयाम–गृहीतः । असि । इति । आह । अपानस्येत्यप – अनस्य । धृत्यै । यत् । उभौ । अपवित्रौ । गृह्येयाताम् । प्राणमिति प्र–अनम् ।

अपान इत्यप - अनः । अनु । नीति । ऋच्छेत् ।

प्रमायुक इति प्र-मायुकः । स्यात् । पवित्रवानिति पवित्र - वान् ।

अन्तर्याम इत्यन्तः - यामः । गृह्यते । **29 (50)**

**<u>TS 6.4.6.4</u>**

प्राणापानयो-र्विधृत्यै प्राणापानौ वा एतौ यदुपा॰श्वन्तर्यामौ व्यान

उपा॒॰शुसवनो यं कामयेत प्रमायुकः स्यादित्यस॰स्पृष्टौ तस्य

सादयेद्-व्यानेनैवास्य प्राणापानौ वि च्छिनत्ति ताजक् प्र मीयते यं

कामयेत सर्वमायुरियादिति स॰ स्पृष्टौ तस्य सादयेद्-व्यानेनैवास्य

प्राणापानौ सं तनोति सर्वमायुरेति ॥ **30**

**<u>TS 6.4.6.4 - Padam</u>**

प्राणापानयोरिति प्राण - अपानयोः । विधृत्या इति वि - धृत्यै ।

प्राणापानाविति प्राण - अपानौ । वै । एतौ । यत् ।

उपा॰श्वन्तर्यामावित्युपा॒॰शु - अन्तर्यामौ । व्यान इति वि - अनः ।

उपा॒॰शुसवन इत्युपा॒॰शु - सवनः । यम् । कामयेत । प्रमायुक

इति प्र - मायुकः । स्यात् । इति । अस॰स्पृष्टावित्यसं - स्पृष्टौ ।

तस्य । सादयेत् । व्यानेनेति वि - अनेन । एव । अस्य ।

प्राणापानाविति प्राण – अपानौ । वीति । छिनत्ति । ताजक् । प्रेति ।

मीयते । यम् । कामयेत । सर्वम् । आयुः । इयात् । इति ।

सꣳस्पृष्टाविति सं–स्पृष्टौ । तस्य । सादयेत् । व्यानेनेति वि–अनेन ।

एव । अस्य । प्राणापानाविति प्राण – अपानौ । समिति । तनोति ।

सर्वम् । आयुः । एति ॥ **30 (44)**

*(त – उभयान् – गृह्यते – चतुश्चत्वारिꣳशच्च) (A6)*

**TS 6.4.7.1**

वाग्वा एषा यदैन्द्रवायवो यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचमेवानु

प्र यन्ति वायुं देवा अब्रुवन्थ् सोमꣳ राजानꣳ हनामेति सो ऽब्रवीद्

वरं ँवृणै मदग्रा एव वो ग्रहा गृह्यान्ता इति तस्मादैन्द्रवायवाग्रा

ग्रहा गृह्यन्ते तमघ्नन्थ् सोऽपूयत् तं देवा नोपाधृष्णुवन् ते वा

युमब्रुवन्निमं नः स्वदये– [ ] **31**

**TS 6.4.7.1 - Padam**

वाक् । वै । एषा । यत् । ऐन्द्रवायव इत्यैन्द्र – वायवः । यत् ।

ऐन्द्रवायवाग्रा इत्यैन्द्रवायव – अग्राः । ग्रहाः । गृह्यन्ते । वाचम् ।

एव । अनु । प्रेति । यन्ति । वायुम् । देवाः । अब्रुवन्न् । सोमम् ।
राजानम् । हनाम । इति । सः । अब्रवीत् । वरम् । वृणै । मदग्रा
इति मत् - अग्राः । एव । वः । ग्रहाः । गृह्यान्तै । इति । तस्मात् ।
ऐन्द्रवायवाग्रा इत्यैन्द्रवायव - अग्राः । ग्रहाः । गृह्यन्ते । तम् ।
अघ्नन्न् । सः । अपूयत् । तम् । देवाः । न । उपेति । अधृष्णुवन्न् ।
ते । वायुम् । अब्रुवन्न् । इमम् । नः । स्वदय । **31 (50)**

## TS 6.4.7.2

-ति सो ऽब्रवीद् वरंँ वृणै मद्देवत्यान्येव वः पात्राण्युच्यान्ता इति
तस्मान्नानादेवत्यानि सन्ति वायव्यान्युच्यन्ते तमेभ्यो वायुरेवास्वदयत्
तस्माद्-यत् पूयति तत् प्रवाते वि षजन्ति वायुर्.हि तस्य पवयिता
स्वदयिता तस्य विग्रहणं नाविन्दन्थ् सा ऽदितिरब्रवीद् वरंँ वृणा अथ
मया वि गृह्णीद्ध्वं मद्देवत्या एव वः सोमाः - [ ] **32**

## TS 6.4.7.2 - Padam

इति । सः । अब्रवीत् । वरम् । वृणै । मद्देवत्यानीति मत्-देवत्यानि ।
एव । वः । पात्राणि । उच्यान्तै । इति । तस्मात् ।
नानादेवत्यानीति नाना - देवत्यानि । सन्ति । वायव्यानि । उच्यन्ते ।

तम् । एभ्यः । वायुः । एव । अस्वदयत् । तस्मात् । यत् । पूयति ।

तत् । प्रवात इति प्र – वाते । वीति । सजन्ति । वायुः । हि । तस्य ।

पवयिता । स्वदयिता । तस्य । विग्रहणमिति वि – ग्रहणम् । न ।

अविन्दन्न् । सा । अदितिः । अब्रवीत् । वरम् । वृणै । अथ ।

मया । वीति । गृह्णीद्ध्वम् । मद्देवत्या इति मत् – देवत्याः । एव ।

वः । सोमाः । **32 (50)**

**<u>TS 6.4.7.3</u>**

सन्ना अस–न्नित्युपयामगृहीतोऽसी–त्याहा–दितिदेवत्यास्तेन

यानि हि दारुमयाणि पात्राण्यस्यै तानि योनेः संभूतानि यानि

मृन्मयानि साक्षात् तान्यस्यै तस्मादेवमाह वाग्वै पराच्य–

व्याकृता ऽवदत् ते देवा इन्द्रमब्रुवन्निमां नो वाचं ँव्याकुर्विति

सो ऽब्रवीद् वरं ँवृणै मह्यं चैवैष वायवे च सह ( ) गृह्याता

इति तस्मादैन्द्रवायवः सह गृह्यते तामिन्द्रो मद्ध्यतो ऽवक्रम्य

व्याकरोत् तस्मादियं ँव्याकृता वागुद्यते तस्माथ् सकृदिन्द्राय

मद्ध्यतो गृह्यते द्विर्वायवे द्वौ हि स वराववृणीत ॥ **33**

## TS 6.4.7.3 - Padam

सन्नाः । असन्न् । इति । उपयामगृहीत इत्युपयाम–गृहीतः । असि ।
इति । आह । अदितिदेवत्या इत्यदिति – देवत्याः । तेन । यानि ।
हि । दारुमयाणीति दारु–मयानि । पात्राणि । अस्यै । तानि । योनेः ।
संभूतानीति सं – भूतानि । यानि । मृन्मयानीति मृत् – मयानि ।
साक्षादिति स – अक्षात् । तानि । अस्यै । तस्मात् । एवम् । आह ।
वाक् । वै । पराची । अव्याकृतेत्यवि – आकृता । अवदत् । ते ।
देवाः । इन्द्रम् । अब्रुवन्न् । इमाम् । नः । वाचम् । व्याकुर्विति
वि – आकुरु । इति । सः । अब्रवीत् । वरम् । वृणै । मह्यम् । च ।
एव । एषः । वायवे । च । सह ( ) । गृह्यातै । इति । तस्मात् ।
ऐन्द्रवायव इत्यैन्द्र – वायवः । सह । गृह्यते । ताम् । इन्द्रः ।
मद्ध्यतः । अवक्रम्येत्यव – क्रम्य । व्याकरोदिति वि – आकरोत् ।
तस्मात् । इयम् । व्याकृतेति वि–आकृता । वाक् । उद्यते । तस्मात् ।
सकृत् । इन्द्राय । मद्ध्यतः । गृह्यते । द्विः । वायवे । द्वौ ।
हि । सः । वरौ । अवृणीत ॥ **33 (78)**

*(स्वदय – सोमाः – सहा – ष्टाविꣳशतिश्च) (A7)*

**TS 6.4.8.1**

मित्रं देवा अब्रुवन्थ् सोमꣳ राजानꣳ हनामेति सो ऽब्रवीन्नाहꣳ सर्वस्य वा अहं मित्रमस्मीति तमब्रुवन्. हनामैवेति सो ऽब्रवीद् वरं वृणै पयसैव मे सोमꣳ श्रीणन्निति तस्मान्–मैत्रावरुणं पयसा श्रीणन्ति तस्मात् पशवोऽपाक्रामन् मित्रः सन् क्रूरमकरिति क्रूरमिव खलु वा एषः – [ ] **34**

**TS 6.4.8.1 - Padam**

मित्रम् । देवाः । अब्रुवन्न् । सोमम् । राजानम् । हनाम । इति । सः । अब्रवीत् । न । अहम् । सर्वस्य । वै । अहम् । मित्रम् । अस्मि । इति । तम् । अब्रुवन्न् । हनाम । एव । इति । सः । अब्रवीत् । वरम् । वृणै । पयसा । एव । मे । सोमम् । श्रीणन्न् । इति । तस्मात् । मैत्रावरुणमिति मैत्रा – वरुणम् । पयसा । श्रीणन्ति । तस्मात् । पशवः । अपेति । अक्रामन्न् । मित्रः । सन्न् । क्रूरम् । अकः । इति । क्रूरम् । इव । खलु । वै । एषः । **34 (50)**

**TS 6.4.8.2**

करोति यः सोमेन यजते तस्मात् पशवो ऽप क्रामन्ति यन्मैत्रावरुणं पयसा श्रीणाति पशुभिरेव तन्मित्रꣳ समर्द्धयति पशुभिर्यजमानं पुरा खलु वावैवं मित्रो ऽवेदप मत् क्रूरं चक्रुषः पशवः क्रमिष्यन्तीति तस्मादेवमवृणीत वरुणं देवा अब्रुवन् त्वया ऽꣳशभुवा सोमꣳ राजानꣳ हनामेति सो ऽब्रवीद् वरं वृँणै मह्यं चै– [ ] **35**

**TS 6.4.8.2 - Padam**

करोति । यः । सोमेन । यजते । तस्मात् । पशवः । अपेति । क्रामन्ति । यत् । मैत्रावरुणमिति मैत्रा–वरुणम् । पयसा । श्रीणाति । पशुभिरिति पशु – भिः । एव । तत् । मित्रम् । समर्द्धयतीति सं – अर्द्धयति । पशुभिरिति पशु – भिः । यजमानम् । पुरा । खलु । वाव । एवम् । मित्रः । अवेत् । अपेति । मत् । क्रूरम् । चक्रुषः । पशवः । क्रमिष्यन्ति । इति । तस्मात् । एवम् । अवृणीत । वरुणम् । देवाः । अब्रुवन्न् । त्वया । अꣳशभुवेत्यꣳश – भुवा । सोमम् । राजानम् । हनाम । इति । सः । अब्रवीत् । वरम् । वृणै । मह्यम् । च । **35 (50)**

**TS 6.4.8.3**

वैष मित्राय च सह गृह्याता इति तस्मान्मैत्रावरुणः सह गृह्यते
तस्माद् राज्ञा राजानमꣳशभुवा घ्नन्ति वैश्येन वैश्यꣳ शूद्रेण
शूद्रं न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा
मित्रावरुणावब्रुवन्निदं नो वि वासयतमिति तावब्रूतां वँरं वृणावहा
एक एवाऽऽवत् पूर्वो ग्रहो गृह्याता इति तस्मादैन्द्रवायवः ( )
पूर्वो मैत्रावरुणाद्–गृह्यते प्राणापानौ ह्येतौ यदुपाꣳश्वन्तर्यामौ
मित्रोऽहरजनयद्–वरुणो रात्रिं ततो वा इदं व्यौच्छद्–यन्–
मैत्रावरुणो गृह्यते व्युष्ट्यै ॥ **36**

**TS 6.4.8.3 - Padam**

एव । एषः । मित्राय । च । सह । गृह्यातै । इति । तस्मात् ।
मैत्रावरुण इति मैत्रा – वरुणः । सह । गृह्यते । तस्मात् । राज्ञा ।
राजानम् । अꣳशभुवेत्यꣳश – भुवा । घ्नन्ति । वैश्येन । वैश्यम् ।
शूद्रेण । शूद्रम् । न । वै । इदम् । दिवा । न । नक्तम् । आसीत् ।

अव्यावृत्तमित्यवि - आवृत्तम् । ते । देवाः । मित्रावरुणाविति

मित्रा - वरुणौ । अब्रुवन्न् । इदम् । नः । वीति । वासयतम् । इति ।

तौ । अब्रूताम् । वरम् । वृणावहै । एकः । एव । आवत् । पूर्वः ।

ग्रहः । गृह्यातै । इति । तस्मात् । ऐन्द्रवायव इत्यैन्द्र - वायवः ( ) ।

पूर्वः । मैत्रावरुणादिति मैत्रा - वरुणात् । गृह्यते ।

प्राणापानाविति प्राण - अपानौ । हि । एतौ । यत् ।

उपा७ंश्वन्तर्यामावित्युपा७ंशु-अन्तर्यामौ । मित्रः । अहः । अजनयत् ।

वरुणः । रात्रिम् । ततः । वै । इदम् । वीति । औच्छत् । यत् ।

मैत्रावरुण इति मैत्रा-वरुणः । गृह्यते । व्युष्ट्या इति

वि - उष्ट्यै ॥ **36 (72)** *(एष-चै-न्द्रवायवो - द्वावि७ंशतिश्च) (A8)*

**TS 6.4.9.1**

यज्ञस्य शिरोऽच्छिद्यत ते देवा अश्विनावब्रुवन् भिषजौ वै स्थ इदं

ँयज्ञस्य शिरः प्रति धत्तमिति तावब्रूतां ँवरं ँवृणावहै ग्रह एव

नावत्रापि गृह्यतामिति ताभ्या-मेतमाश्विन-मगृह्णन् ततो वै तौ

यज्ञस्य शिरः प्रत्यधत्तां ँयदाश्विनो गृह्यते यज्ञस्य निष्कृत्यै तौ देवा अब्रुवन्नपूतौ वा इमौ मनुष्यचरौ– [ ] **37**

## TS 6.4.9.1 - Padam

यज्ञस्य । शिरः । अच्छिद्यत । ते । देवाः । अश्विनौ । अब्रुवन्न् । भिषजौ । वै । स्थः । इदम् । यज्ञस्य । शिरः । प्रतीति । धत्तम् । इति । तौ । अब्रूताम् । वरम् । वृणावहै । ग्रहः । एव । नौ । अत्र । अपीति । गृह्यताम् । इति । ताभ्याम् । एतम् । आश्विनम् । अगृह्णन्न् । ततः । वै । तौ । यज्ञस्य । शिरः । प्रतीति । अधत्ताम् । यत् । आश्विनः । गृह्यते । यज्ञस्य । निष्कृत्या इति निः – कृत्यै । तौ । देवाः । अब्रुवन्न् । अपूतौ । वै । इमौ । मनुष्यचराविति मनुष्य – चरौ । **37 (50)**

## TS 6.4.9.2

भिषजाविति तस्माद् ब्राह्मणेन भेषजं न कार्यमपूतो ह्ये(**1**)षो ऽमेद्ध्यो यो भिषक्तौ बहिष्पवमानेन पवयित्वा ताभ्या–मेतमाश्विन–मगृह्णन् तस्माद् बहिष्पवमाने स्तुत आश्विनो गृह्यते तस्मादेवं ँविदुषा

बहिष्पवमान उपसद्यः पवित्रं ँवै बहिष्पवमान आत्मानमेव पवयते

तयो स्त्रेधा भैषज्यं ँवि न्यदधुरग्नौ तृतीयमफ्सु तृतीयं ब्राह्मणे तृतीयं

तस्मादुदपात्र– [ ] **38**

**TS 6.4.9.2 - Padam**

भिषजौ । इति । तस्मात् । ब्राह्मणेन । भेषजम् । न । कार्यम् ।

अपूतः । हि । एषः । अमेद्ध्यः । यः । भिषक् । तौ ।

बहिष्पवमानेनेति बहिः – पवमानेन । पवयित्वा । ताभ्याम् । एतम् ।

आश्विनम् । अगृह्णन्न् । तस्मात् । बहिष्पवमान इति बहिः–पवमाने ।

स्तुते । आश्विनः । गृह्यते । तस्मात् । एवम् । विदुषा ।

बहिष्पवमान इति बहिः – पवमानः । उपसद्य इत्युप – सद्यः ।

पवित्रम् । वै । बहिष्पवमान इति बहिः – पवमानः । आत्मानम् ।

एव । पवयते । तयोः । त्रेधा । भैषज्यम् । वि । नीति । अदधुः ।

अग्नौ । तृतीयम् । अफ्स्वित्यप्–सु । तृतीयम् । ब्राह्मणे । तृतीयम् ।

तस्मात् । उदपात्रमित्युद – पात्रम् । **38 (50)**

**TS 6.4.9.3**

-मुपनिधाय ब्राह्मणं दक्षिणतो निषाद्य भेषजं कुर्याद् यावदेव
भेषजं तेन करोति समर्द्धुकमस्य कृतं भवति ब्रह्मवादिनो वदन्ति
कस्माथ् सत्यादेकपात्रा द्विदेवत्या गृह्यन्ते द्विपात्रा हूयन्त इति
यदेकपात्रा गृह्यन्ते तस्मादेको ऽन्तरतः प्राणो द्विपात्रा हूयन्ते
तस्माद् द्वौद्वौ बहिष्टात् प्राणाः प्राणा वा एते यद् द्विदेवत्याः
पशव इडा यदिडां पूर्वां द्विदेवत्येभ्य उपह्वयेत- [ ] **39**

**TS 6.4.9.3 - Padam**

उपनिधायेत्युप - निधाय । ब्राह्मणम् । दक्षिणतः । निषाद्येति
नि - साद्य । भेषजम् । कुर्यात् । यावत् । एव । भेषजम् । तेन ।
करोति । समर्द्धुकमिति सं - अर्द्धुकम् । अस्य । कृतम् ।
भवति । ब्रह्मवादिन इति ब्रह्म - वादिनः । वदन्ति । कस्मात् ।
सत्यात् । एकपात्रा इत्येक - पात्राः । द्विदेवत्या इति द्वि-देवत्याः ।
गृह्यन्ते । द्विपात्रा इति द्वि - पात्राः । हूयन्ते । इति । यत् । एकपात्रा
इत्येक - पात्राः । गृह्यन्ते । तस्मात् । एकः । अन्तरतः ।

प्राण इति प्र – अनः । द्विपात्रा इति द्वि–पात्राः । हूयन्ते । तस्मात् । द्वौद्वाविति द्वौ – द्वौ । बहिष्टात् । प्राणा इति प्र – अनाः । प्राणा इति प्र – अनाः । वै । एते । यत् । द्विदेवत्या इति द्वि – देवत्याः । पशवः । इडा । यत् । इडाम् । पूर्वाम् । द्विदेवत्येभ्य इति द्वि – देवत्येभ्यः । उपह्वयेतेत्युप – ह्वयेत । **39 (50)**

**TS 6.4.9.4**

पशुभिः प्राणानन्तर्दधीत प्रमायुकः स्याद् द्विदेवत्यान् भक्षयित्वेडामुप ह्वयते प्राणानेवाऽऽत्मन् धित्वा पशूनुप ह्वयते वाग्वा ऐन्द्रवायवश्चक्षु–र्मैत्रावरुणः श्रोत्रमाश्विनः पुरस्तादैन्द्रवायवं भक्षयति तस्मात् पुरस्ताद् वाचा वदति पुरस्तान्मैत्रावरुणं तस्मात् पुरस्ताच्चक्षुषा पश्यति सर्वतः परिहारमाश्विनं तस्माथ् सर्वतः श्रोत्रेण शृणोति प्राणा वा एते यद् द्विदेवत्या– [ ] **40**

**TS 6.4.9.4 - Padam**

पशुभिरिति पशु – भिः । प्राणानिति प्र–अनान् । अन्तः । दधीत । प्रमायुक इति प्र – मायुकः । स्यात् । द्विदेवत्यानिति द्वि–देवत्यान् । भक्षयित्वा । इडाम् । उपेति । ह्वयते । प्राणानिति प्र – अनान् ।

एव । आत्मन्न् । धित्वा । पशून् । उपेति । ह्वयते । वाक् । वै ।
ऐन्द्रवायव इत्यैन्द्र–वायवः । चक्षुः । मैत्रावरुण इति मैत्रा–वरुणः ।
श्रोत्रम् । आश्विनः । पुरस्तात् । ऐन्द्रवायवमित्यैन्द्र – वायवम् ।
भक्षयति । तस्मात् । पुरस्तात् । वाचा । वदति । पुरस्तात् ।
मैत्रावरुणमिति मैत्रा – वरुणम् । तस्मात् । पुरस्तात् । चक्षुषा ।
पश्यति । सर्वतः । परिहारमिति परि–हारम् । आश्विनम् । तस्मात् ।
सर्वतः । श्रोत्रेण । शृणोति । प्राणा इति प्र – अनाः । वै । एते ।
यत् । द्विदेवत्या इति द्वि – देवत्याः । **40 (50)**

**TS 6.4.9.5**

अरिक्तानि पात्राणि सादयति तस्मादरिक्ता अन्तरतः प्राणा यतः खलु
वै यज्ञस्य विततस्य न क्रियते तदनु यज्ञ꣡ रक्षा꣡स्यव चरन्ति
यदरिक्तानि पात्राणि सादयति क्रियमाणमेव तद् यज्ञस्य शये रक्षसा
–मनन्ववचाराय दक्षिणस्य हविर्द्धानस्योत्तरस्यां ँवर्तन्या꣡ सादयति
वाच्येव वाचं दधात्या तृतीयसवनात् परि शेरे यज्ञस्य सन्तत्यै ॥ **41**

**TS 6.4.9.5 - Padam**

अरिक्तानि । पात्राणि । सादयति । तस्मात् । अरिक्ताः । अन्तरतः ।
प्राणा इति प्र – अनाः । यतः । खलु । वै । यज्ञस्य । विततस्येति
वि – ततस्य । न । क्रियते । तत् । अन्विति । यज्ञम् । रक्षाꣳसि ।
अवेति । चरन्ति । यत् । अरिक्तानि । पात्राणि । सादयति ।
क्रियमाणम् । एव । तत् । यज्ञस्य । शये । रक्षसाम् ।
अनन्ववचारायेत्यननु – अवचाराय । दक्षिणस्य ।
हविर्द्धानस्येति हविः – धानस्य । उत्तरस्यामित्युत् – तरस्याम् ।
वर्तन्याम् । सादयति । वाचि । एव । वाचम् । दधाति । एति ।
तृतीयसवनादिति तृतीय – सवनात् । परीति । शेरे । यज्ञस्य ।
सन्तत्या इति सं – तत्यै ॥ **41 (46)** ***(मनुष्यचरा – वुदपात्र – मुपह्वयेत – द्विदेवत्याः – षट्चत्वारिꣳशच्च) (A9)***

**TS 6.4.10.1**

बृहस्पतिर्देवानां पुरोहित आसी–च्छण्डामर्का–वसुराणां ब्रह्मण्वन्तो
देवा आसन् ब्रह्मण् वन्तोऽसुरास्ते(1) ऽन्योऽन्यं नाशक्नुव–न्नभिभवितुं
ते देवाः शण्डामर्का–वुपामन्त्रयन्त तावब्रूतां ँवरं ँवृणावहै ग्रहावेव

नावत्रापि गृह्येतामिति ताभ्यामेतौ शुक्रामन्थिना–वगृह्णन् ततो देवा अभवन् पराऽसुरा यस्यैवं ँविदुषः शुक्रामन्थिनौ गृह्येते भवत्यात्मना परा– [ ] 42

**TS 6.4.10.1 - Padam**

बृहस्पतिः । देवानाम् । पुरोहित इति पुरः – हितः । आसीत् । शण्डामर्काविति शण्डा – मर्कौ । असुराणाम् । ब्रह्मण्वन्त इति ब्रह्मण्ण् – वन्तः । देवाः । आसन्न् । ब्रह्मण्वन्त इति ब्रह्मण्ण् – वन्तः । असुराः । ते । अन्यः । अन्यम् । न । अशक्नुवन्न् । अभिभवितुमित्यभि – भवितुम् । ते । देवाः । शण्डामर्काविति शण्डा – मर्कौ । उपेति । अमन्त्रयन्त । तौ । अब्रूताम् । वरम् । वृणावहै । ग्रहौ । एव । नौ । अत्र । अपीति । गृह्येताम् । इति । ताभ्याम् । एतौ । शुक्रामन्थिनाविति शुक्रा – मन्थिनौ । अगृह्णन्न् । ततः । देवाः । अभवन्न् । परेति । असुराः । यस्य । एवम् । विदुषः । शुक्रामन्थिनाविति शुक्रा – मन्थिनौ । गृह्येते इति । भवति । आत्मना । परेति । **42 (50)**

**TS 6.4.10.2**

ऽस्य भ्रातृव्यो भवति तौ देवा अपनुद्याऽऽत्मन इन्द्रायाजुहवु–रपनुत्तौ

शण्डामर्कौ सहामुनेति ब्रूयाद्–यं द्विष्याद्–यमेव द्वेष्टि तेनैनौ

सहाप नुदते स प्रथमः संकृति–र्विश्वकर्मेत्येवैना–वात्मन इन्द्राया–

जुहवुरिन्द्रो ह्येतानि रूपाणि करिक्रदचरदसौ वा आदित्यः

शुक्रश्चन्द्रमा मन्थ्यपिगृह्य प्राञ्चौ नि– [ ] **43**

**TS 6.4.10.2 - Padam**

अस्य । भ्रातृव्यः । भवति । तौ । देवाः । अपनुद्येत्यप – नुद्य ।

आत्मने । इन्द्राय । अजुहवुः । अपनुत्तावित्यप – नुत्तौ ।

शण्डामर्काविति शण्डा – मर्कौ । सह । अमुना । इति । ब्रूयात् ।

यम् । द्विष्यात् । यम् । एव । द्वेष्टि । तेन । एनौ । सह । अपेति ।

नुदते । सः । प्रथमः । संकृतिरिति सं – कृतिः । विश्वकर्मेति

विश्व – कर्मा । इति । एव । एनौ । आत्मने । इन्द्राय । अजुहवुः ।

इन्द्रः । हि । एतानि । रूपाणि । करिक्रत् । अचरत् । असौ ।

वै । आदित्यः । शुक्रः । चन्द्रमाः । मन्थी । अपिगृह्येत्यपि – गृह्य ।

प्राञ्चौ । निरिति । **43 (50)**

**TS 6.4.10.3**

ष्क्रामत–स्तस्मात् प्राञ्चौ यन्तौ न पश्यन्ति प्रत्यञ्चावावृत्य जुहुतस्तस्मात् प्रत्यञ्चौ यन्तौ पश्यन्ति चक्षुषी वा एते यज्ञस्य यच्छुक्रामन्थिनौ नासिकोत्तरवेदिरभितः परिक्रम्य जुहुतस्तस्मादभितो नासिकां चक्षुषी तस्मान्नासिकया चक्षुषी विधृते सर्वतः परि क्रामतो रक्षसामपहत्यै देवा वै याः प्राचीराहुतीरजुहवुर्ये पुरस्तादसुरा आसन् ता॒ स्ताभिः प्रा– [ ] **44**

**TS 6.4.10.3 - Padam**

क्रामतः । तस्मात् । प्राञ्चौ । यन्तौ । न । पश्यन्ति । प्रत्यञ्चौ । आवृत्येत्या – वृत्य । जुहुतः । तस्मात् । प्रत्यञ्चौ । यन्तौ । पश्यन्ति । चक्षुषी इति । वै । एते इति । यज्ञस्य । यत् । शुक्रामन्थिनाविति शुक्रा – मन्थिनौ । नासिका । उत्तरवेदिरित्युत्तर– वेदिः । अभितः । परिक्रम्येति परि – क्रम्य । जुहुतः । तस्मात् । अभितः । नासिकाम् । चक्षुषी इति । तस्मात् । नासिकया । चक्षुषी इति । विधृते इति वि–धृते । सर्वतः । परीति ।

क्रामतः । रक्षसाम् । अपहत्या इत्यप – हत्यै । देवाः । वै । याः ।
प्राचीः । आहुतीरित्या – हुतीः । अजुहवुः । ये । पुरस्तात् ।
असुराः । आसन्न् । तान् । ताभिः । प्रेति । **44 (50)**

**TS 6.4.10.4**

–णुदन्त याः प्रतीचीर्ये पश्चादसुरा आसन् ता७ स्ताभिरपानुदन्त
प्राचीरन्या आहुतयो हूयन्ते प्रत्यञ्चौ शुक्रामन्थिनौ पश्चाच्चैव
पुरस्ताच्च यजमानो भ्रातृव्यान् प्र णुदते तस्मात् पराचीः प्रजाः
प्र वीयन्ते प्रतीचीर्जायन्ते शुक्रामन्थिनौ वा अनु प्रजाः प्र
जायन्ते ऽत्त्रीश्चाद्याश्च सुवीराः प्रजाः प्रजनयन् परीहि शुक्रः
शुक्रशोचिषा– [ ] **45**

**TS 6.4.10.4 - Padam**

अनुदन्त । याः । प्रतीचीः । ये । पश्चात् । असुराः । आसन्न् । तान् ।
ताभिः । अपेति । अनुदन्त । प्राचीः । अन्याः । आहुतय इत्या–हुतयः ।
हूयन्ते । प्रत्यञ्चौ । शुक्रामन्थिनाविति शुक्रा – मन्थिनौ । पश्चात् ।
च । एव । पुरस्तात् । च । यजमानः । भ्रातृव्यान् । प्रेति । नुदते ।
तस्मात् । पराचीः । प्रजा इति प्र – जाः । प्रेति । वीयन्ते । प्रतीचीः ।

जायन्ते । शुक्रामन्थिनाविति शुक्रा – मन्थिनौ । वै । अन्विति ।

प्रजा इति प्र – जाः । प्रेति । जायन्ते । अत्त्रीः । च । आद्याः । च ।

सुवीरा इति सु – वीराः । प्रजा इति प्र – जाः ।

प्रजनयन्निति प्र – जनयन्न् । परीति । इहि । शुक्रः ।

शुक्रशोचिषेति शुक्र – शोचिषा । **45 (50)**

**TS 6.4.10.5**

सुप्रजाः प्रजाः प्रजनयन् परीहि मन्थी मन्थिशोचिषेत्याहैता वै

सुवीरा या अत्त्रीरेताः सुप्रजा या आद्या य एवं वेदात्त्र्यस्य प्रजा

जायते नाऽऽद्या प्रजापतेरक्ष्यश्वयत् तत् परा ऽऽपतत् तद् विकङ्कतं

प्राविशत् तद् विकङ्कते नारमत तद् यवं प्राविशत् तद् यवे ऽरमत तद्

यवस्य– [ ] **46**

**TS 6.4.10.5 - Padam**

सुप्रजा इति सु – प्रजाः । प्रजा इति प्र – जाः । प्रजनयन्निति

प्र – जनयन्न् । परीति । इहि । मन्थी । मन्थिशोचिषेति

मन्थि – शोचिषा । इति । आह । एताः । वै ।

सुवीरा इति सु – वीराः । याः । अत्रीः । एताः । सुप्रजा इति सु – प्रजाः । याः । आद्याः । यः । एवम् । वेद । अत्री । अस्य । प्रजेति प्र – जा । जायते । न । आद्या । प्रजापतेरिति प्रजा–पतेः । अक्षि । अश्वयत् । तत् । परेति । अपतत् । तत् । विकङ्कतमिति वि–कङ्कतम् । प्रेति । अविशत् । तत् । विकङ्कत इति वि – कङ्कते । न । अरमत । तत् । यवम् । प्रेति । अविशत् । तत् । यवे । अरमत । तत् । यवस्य । **46 (50)**

**<u>TS 6.4.10.6</u>**

यवत्वं ँयद् वैकङ्कतं मन्थिपात्रं भवति सक्तुभिः श्रीणाति प्रजापतेरेव तच्चक्षुः सं भरति ब्रह्मवादिनो वदन्ति कस्माथ् सत्यान्मन्थिपात्र७ँ सदो नाश्ञुत इत्यार्तपात्र७ँ हीति ब्रूयाद्–यदश्ञुवीतान्धो ऽद्ध्वर्युः स्यादार्तिमार्च्छेत् तस्मान्नाश्ञुते ॥ **47**

**<u>TS 6.4.10.6 - Padam</u>**

यवत्वमिति यव – त्वम् । यत् । वैकङ्कतम् । मन्थिपात्रमिति मन्थि – पात्रम् । भवति । सक्तुभिरिति सक्तु – भिः । श्रीणाति । प्रजापतेरिति प्रजा – पतेः । एव । तत् । चक्षुः । समिति । भरति ।

ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । कस्मात् । सत्यात् ।
मन्थिपात्रमिति मन्थि – पात्रम् । सदः । न । अश्ञुते । इति ।
आर्तपात्रमित्यार्त – पात्रम् । हि । इति । ब्रूयात् । यत् । अश्ञुवीत ।
अन्धः । अद्ध्वर्युः । स्यात् । आर्तिम् । एति । ऋच्छेत् । तस्मात् ।
न । अश्ञुते ॥ **47 (37)** ***(आत्मना परा – नि – ष्प्र – शुक्रशोचिषा – यवस्य – सप्तत्रिँ॒शच्च)*** *(A10)*

**TS 6.4.11.1**

देवा वै यद् यज्ञे ऽकुर्वत तदसुरा अकुर्वत ते देवा आग्रयणाग्रान् ग्रहानपश्यन् तानगृह्णत ततो वै तेऽग्रं पर्यायन्. यस्यैवं ँविदुष आग्रयणाग्रा ग्रहा गृह्यन्तेऽग्रमेव समानानां पर्येति रुग्णवत्यर्चा भ्रातृव्यवतो गृह्णीयाद्–भ्रातृव्यस्यैव रुक्त्वा ऽग्रँ॒ समानानां पर्येति ये देवा दिव्येकादश स्थेत्याहै– [ ] **48**

**TS 6.4.11.1 - Padam**

देवाः । वै । यत् । यज्ञे । अकुर्वत । तत् । असुराः । अकुर्वत । ते ।
देवाः । आग्रयणाग्रानित्याग्रयण – अग्रान् । ग्रहान् । अपश्यन्न् ।

तान् । अगृह्णत । ततः । वै । ते । अग्रम् । परीति । आयन्न् । यस्य । एवम् । विदुषः । आग्रयणाग्रा इत्याग्रयण-अग्राः । ग्रहाः । गृह्यन्ते । अग्रम् । एव । समानानाम् । परीति । एति । रुग्णवत्येति रुग्ण - वत्या । ऋचा । भ्रातृव्यवत इति भ्रातृव्य-वतः । गृह्णीयात् । भ्रातृव्यस्य । एव । रुक्त्वा । अग्रम् । समानानाम् । परीति । एति । ये । देवाः । दिवि । एकादश । स्थ । इति । आह । **48 (50)**

**TS 6.4.11.2**

-तावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वाभ्यो गृह्णात्येष ते योनि र्विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येष देवतया वाग्वै देवेभ्यो-ऽपाक्रामद्-यज्ञायातिष्ठमाना ते देवा वाच्यपक्रान्तायां तूष्णीं ग्रहानगृह्णत सा ऽमन्यत वागन्तर्यन्ति वै मेति सा ऽऽग्रयणं प्रत्यागच्छत् तदाग्रयणस्याऽऽग्रयणत्वं- [ ] **49**

**TS 6.4.11.2 - Padam**

एतावतीः । वै । देवताः । ताभ्यः । एव । एनम् । सर्वाभ्यः । गृह्णाति । एषः । ते । योनिः । विश्वेभ्यः । त्वा । देवेभ्यः । इति । आह । वैश्वदेव इति वैश्व - देवः । हि । एषः । देवतया । वाक् ।

वै । देवेभ्यः । अपेति । अक्रामत् । यज्ञाय । अतिष्ठमाना । ते ।

देवाः । वाचि । अपक्रान्तायामित्यप–क्रान्तायाम् । तूष्णीम् । ग्रहान् ।

अगृह्णत । सा । अमन्यत । वाक् । अन्तः । यन्ति । वै । मा । इति ।

सा । आग्रयणम् । प्रति । एति । अगच्छत् । तत् । आग्रयणस्य ।

आग्रयणत्वमित्याग्रयण – त्वम् । **49 (50)**

**TS 6.4.11.3**

तस्मादाग्रयणे वाग्वि सृज्यते यत् तूष्णीं पूर्वे ग्रहा गृह्यन्ते

यथाथ्सारीयति म आख इयति नाप राथ्स्या–मीत्युपावसृजत्येवमेव

तदद्ध्वर्युराग्रयणं गृहीत्वा यज्ञमारभ्य वाचं ँवि सृजते त्रिर्.हिं

करोत्युद्गातृ–नेव तद् वृणीते प्रजापतिर्वा एष यदाग्रयणो

यदाग्रयणं गृहीत्वा हिंकरोति प्रजापतिरेव– [ ] **50**

**TS 6.4.11.3 - Padam**

तस्मात् । आग्रयणे । वाक् । वीति । सृज्यते । यत् । तूष्णीम् । पूर्वे ।

ग्रहाः । गृह्यन्ते । यथा । थ्सारी । इयति । मे । आखः । इयति । न ।

अपेति । राथ्स्यामि । इति । उपावसृजतीत्युप–अवसृजति । एवम् ।

एव । तत् । अद्ध्वर्युः । आग्रयणम् । गृहीत्वा । यज्ञम् ।
आरभ्येत्या–रभ्य । वाचम् । वीति । सृजते । त्रिः । हिम् । करोति ।
उद्गातृनित्युत् – गातृन् । एव । तत् । वृणीते । प्रजापतिरिति
प्रजा – पतिः । वै । एषः । यत् । आग्रयणः । यत् । आग्रयणम् ।
गृहीत्वा । हिंकरोतीति हिम् – करोति । प्रजापतिरिति प्रजा–पतिः ।
एव । **50 (50)**

**<u>TS 6.4.11.4</u>**

तत् प्रजा अभि जिघ्रति तस्माद् वथ्सं जातं गौरभि जिघ्रत्यात्मा वा
एष यज्ञस्य यदाग्रयणः सवनेसवने ऽभि गृह्णात्यात्मन्नेव यज्ञꣳ
सं तनोत्युपरिष्टादा नयति रेत एव तद् दधात्यधस्तादुप गृह्णाति
प्र जनयत्येव तद्–ब्रह्मवादिनो वदन्ति कस्माथ् सत्याद्–गायत्री
कनिष्ठा छन्दसाꣳ सती सर्वाणि सवनानि वहतीत्ये ( )–ष वै
गायत्रियै वथ्सो यदाग्रयणस्तमेव तदभिनिवर्तꣳ सर्वाणि सवनानि
वहति तस्माद् वथ्समपाकृतं गौरभि नि वर्तते ॥ **51**

**TS 6.4.11.4 - Padam**

तत् । प्रजा इति प्र – जाः । अभीति । जिघ्रति । तस्मात् । वथ्सम् ।

जातम् । गौः । अभीति । जिघ्रति । आत्मा । वै । एषः । यज्ञस्य ।

यत् । आग्रयणः । सवनेसवन इति सवने – सवने । अभीति ।

गृह्णाति । आत्मन्न् । एव । यज्ञम् । समिति । तनोति । उपरिष्टात् ।

एति । नयति । रेतः । एव । तत् । दधाति । अधस्तात् । उपेति ।

गृह्णाति । प्रेति । जनयति । एव । तत् । ब्रह्मवादिन इति

ब्रह्म – वादिनः । वदन्ति । कस्मात् । सत्यात् । गायत्री । कनिष्ठा ।

छन्दसाम् । सती । सर्वाणि । सवनानि । वहति । इति ( ) । एषः ।

वै । गायत्रियै । वथ्सः । यत् । आग्रयणः । तम् । एव । तत् ।

अभिनिवर्तमित्यभि – निवर्तम् । सर्वाणि । सवनानि । वहति ।

तस्मात् । वथ्सम् । अपाकृतमित्यप – आकृतम् ।

गौः । अभि । नीति । वर्तते ॥ **51 (70)**

*(आहाऽऽ – ग्रयणत्वं – प्रजापतिरेवे – ति – विꣳशतिश्च) (A11)*

===========

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(यज्ञेन ता उपयड्भि – देवा वै यज्ञमाग्नीध्रे – ब्रह्मवादिनः स त्वै – देवस्य ग्रावाणं – प्राणो वा उपा॰श्वग्रा – देवा वा उपा॰शौ – वाग्वै – मित्रं – यँज्ञस्य – बृहस्पति – देवा वा आग्रयणाग्रा – नेकादश)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(यज्ञेन – लोके पशुमान्थ् स्याथ् – सवनं माध्यन्दिनं – वाँग्वा – अरिक्तानि – तत् प्रजा – एकपञ्चाशत्)

**First and Last Padam of Fourth Prasnam of 6th Kandam**

(यज्ञेन – नि वर्तते)

**॥ हरिः ओं ॥**

**॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे**

**षष्ठकाण्डे चतुर्थः प्रश्नः समाप्तः ॥**

**Details of Panchati and Padam for Kandam 6, Prasanam 4 (TS 6.4)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 5 | 232 |
| Anuvakam 2 | 6 | 326 |
| Anuvakam 3 | 4 | 225 |
| Anuvakam 4 | 4 | 194 |
| Anuvakam 5 | 7 | 352 |
| Anuvakam 6 | 4 | 194 |
| Anuvakam 7 | 3 | 178 |
| Anuvakam 8 | 3 | 172 |
| Anuvakam 9 | 5 | 246 |
| Anuvakam 10 | 6 | 287 |
| Anuvakam 11 | 4 | 220 |
| Total → | 51 | 2626 |

**Notes:**

**Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**

**Please download our vedic compilations from our web site www.vedavms.in**